शालग्रामेप्येवमेवकार्यंनावाहनादिच॥ अन्यत्रचलमूर्त्तौतुकर्त्तव्यंतत्तदर्चकैः॥३३॥ त
त्रापिदार्व्यांलेख्यायांतज्जलस्पर्शोनुलेपनं॥ नैवकार्यंहिजनकेनकर्त्तव्यंपरिमार्जनम्॥३४॥ उद
ङ्मुखःप्राङ्मुखोवाचलायांसन्मुखोथवा॥ यथाशक्तियथालब्धैरुपहारैर्यजेद्धरिं॥३५॥ अ
शानिःस्वप्नन क्रियस्यामर्पितेनांबुनादिमः॥ पीतत्वक्तव्यतिविश्वात्माकिमुताविलहूजया॥३६
पूजामाश्रुत्यादिदृष्टेनेनरत्नहेमाद्युत्तंक्रियाः॥ चतुर्विधंचाप्यन्नाद्यंदत्तंयत्कालिनीमुद॥३७॥ त
स्मात्क्रियमताकार्यंपूजासत्त्वेयथेमुने॥ श्रीकृष्णस्यार्चनंनित्यंसर्वानीशश्चदायिनः॥३८॥
इति श्रीस्कंदपुराणे विष्णुखंडे श्रीवाक्रदेवमाहात्म्ये क्रियायोगेऽधिकारादिनिरूपणं नाम ष

ष्ठवर्ज्जनाख्यायां षड्विंशोऽध्यायः॥२६॥ भूमिशुद्धिमाह खननेति॥१।२॥ अग्न्यावह्निकोणे॥ श्वेतं श्वेतेन

ड्विंशोऽध्यायः॥२६॥ श्रीनारायण उवाच॥ खननीक्षणालेपाद्यैःशोधितेधरणीतले चतु
ष्कोणंन्यसेत्पीठंनानारंगक्षोणिते १ अर्चकःप्राङ्मुखःपीठपादान्कोणेषुकारयेत् चतुर्ष्व
तेशुभधर्मादीन्स्थापयेत्सिंहरूपिणः २ आग्नेयोधर्मंन्यसेच्छ्वेतंज्ञानंश्यामंचनैर्ऋते वायौतु
पीतंवैराग्यंश्यामसमैश्वर्यमैशिके ३ मनोधीचित्ताहंकारानक्रमात्पूर्वादिदिक्षुच वि
सिता न्यसेत्पीठगात्रेषुहरिद्रक्तसितान्ततः ४ स्थाप्यारक्तसितश्यामारजःसत्त्वतमोगुणाः पीठ
स्यपद्मिकायांतुत्रयोपिमुनिसत्तम ५ अंतःकरणरूपेषुगात्रेषुपृथक्चतुर्ष्वपि विमलाद्या
न्यसेच्छक्तीर्देहेएकैकगात्रके ६ विमलोत्कर्षिणीतिहृगौरांग्यौपूर्वतोन्यसेत् वामदंष्ट्रौ
श्यामांवीणांहरिद्रांह्वोस्वलंकृते ७ वर्णम् रीतिकर्ईशानकोण ३ मनआदीनांचतुर्णांवर्णानाह हरिदि

वाम्हरी ११७ नि ७ ५ ६ ७ ८ ९ परिवादिनीं नसतंत्रीवीणाम् १० अनुग्रहेत्याद्युपादेश राधिकामार्चयेत् ११ १२ ५प अ॰२९

ज्ञानाक्रिये न्यसेद्वाम्ये पीतवस्त्रे रुणद्युती रक्तानालंवादयंतीं मृदंगमपरां तथा ८ योग
प्रह्वे न्यसेत्पश्चाद्वायव्ये मित्ररूणगांसमौ सदैव मुरलीं नौदयंतौ पृथक्पृथक् ९ सत्येशानेदे नेवा
मवर्णौ तत्रस्थांततो न्यसेत् श्यामांशुकैवादयंत्यावुभेते परिवादिनीम् १० अनुग्रहा
ख्यापद्रिकायां स्थाप्यैकावद्धतांजलिः सर्वाभरणताम्रकर्णत्याद्विभुजाः कृतिनूपुराः ११
पीगेपरिशिनद्वीपं कुर्वीत श्वेतवासुका तन्मध्ये षट्दलं पद्मं कुर्वीतोज्ज्वलकर्णिकम् १२
द्वादशांशं परित्यज्य पद्मक्षेत्रस्य बाह्यतः हस्तैर्द्विभिस्तस्य मध्यं विभजेत्समभागतः १३
तत्राद्यं कर्णिकास्थानं केसराणां तु मध्यमं पत्राणां तु तृतीयं स्याद्द्वारगाणि तु बाह्यतः १४

टीका स्यपक्षेत्रं फलं तस्य द्वादशांशं बाह्यतो दलाम्न भागतः परित्यज्य तस्य पद्मस्य मध्यं त्रिभिर्हस्तैर्वर्तुलैरेखाभिः समभागतः स
मानविभागेन विभजेत् १३ १४

१५ १६ १७ १८ श्रीकृष्णं सर्वैकलक्षणं श्रीकृष्णप्रतिमाम् तस्य श्रीकृष्णवामे वामपार्श्वे राधिकाप्रतिमां

परितस्तस्य चतुरंचतुर्द्वारं प्रकल्पयेत् रंगद्रव्यैर्बहुविधैर्हरिद्राकुंकुमादिभिः १५ कुर्वीत
तंडुलैर्वापि तत्र पद्मादिशोभनम् पद्मस्य कर्णिकामध्ये हेमवर्णं प्रकल्पयेत् १६ शोण
वर्णानि पत्राणि परितस्तस्य चार्चकः कुर्याद्दशाप्यष्टदिक्षु स्वर्णवर्णानि वा मुने १७
पूर्वं तु गोपुरं शोणं श्यामं कुर्याच्च दक्षिणम् पीतवर्णं पश्चिमं च स्फटिकाभं तथोत्तरम् १८
चित्राणि अंतराले चतुष्कोणे पुरपद्मयोः कृत्वा मध्ये पद्मे श्रीकृष्णं तद्वामे राधिकां न्यसेत्
१९ राधाकृष्णस्याग्रतः श्वेतं संकर्षणं न्यसेत् चतुर्बाहुं धृतच्छत्रं गौरांगं नीलवाससम्
२० दक्षे न्यसेद्भगवतः प्रद्युम्नं पीतवाससम् चतुर्भुजं घनश्यामं धृत्वाचामरमास्थितम् २१
वामेऽनिरुद्धं हरेर्न्यसेदरुणवाससम् इंद्रनीलमणिश्यामं संस्थितं धृतचामरम् २२

न्यसेत् १९ २० २१ २२

वास्करी ২৩ एवमष्टस्वत्स्वानेषु पीठन्यासस्थापिताःसुरितिशेषः २४ तस्यापनक्रममाहस्थापयेदिति विंशत्या २५ २६ अ॰२७

११५

त्रयोप्येते तु कर्त्तव्या नानालंकारशोभिताः स्फुरन्मार्ग्यरत्नमुकुटास्तारुण्येन मनोहराः २३
ततोवनारीस्फहरेःकेसरेष्वष्टसुक्रमात् राकैकस्मिन्समे हुत्वावष्टसुवेवं द्विषोडश्या २४
स्थापयेद्वामनं तुर्वं पूर्वस्मिन्केसरेग्रतः घनश्यामा तु नौ सौनौ करुणौ ब्रह्मचारिणौ २५
सितांशुकौ करे दक्षे विचित्रतोफुल्लपंकजं स्त्रनपं वामहस्ते च शोभितौ यज्ञोपवीतिनौ २६ क
ल्किनं पर्श्चरामं च वक्रिकोणेथ विन्यसेत् खड्गपाणिस्तत्र कल्की पर्शुपाणिस्तथापरः
२७ उभौ गौरौ च ताम्राक्षौ जटिलौ सितवाससौ यज्ञोपवीतिनौ कार्यौ न्यस्तक्रौधमहारयौ
२८ हयग्रीववराहौ च स्थापयेद्याम्यकेसरे हयग्रीवोहयास्यःस्यान्नरांगश्च चतुर्भुजः २९
शंखादिभिस्स्वर्णवर्णो धृतदिव्यसितांबरः वराहस्तु वराहास्यो नरांगःस्याच्चतुर्भुजः ३०

२७ २८ २९ ३०

तु

३१ नराकारौ मत्स्यो मत्स्याकारः कूर्मः कूर्माकार इति ३२ ३३ ३४ ३५ ३६ गणपतेर्वास्फरेवाचतारस्वंब

शंखचक्रगदाब्जानि दधत्पीतांबरं तथा मधुपिंगलवर्णश्च कर्त्तव्यो द्विभुजोथवा ३१ म
त्स्यकूर्मौ नैरृते च स्थापयेत्केसरे ततः करे रधस्तदाकारा वूर्ध्वं तौ तु नराकृती ३२ वामे
शंखं गदां दक्षे पाणौ च रदधतावुभौ श्यामस्कंदरदेहौ च कर्त्तव्यौ धृतभूषणौ ३३ धन्वंत
रिं नृसिंहं च पश्चिमे केसरे न्यसेत् धन्वंतरिः शुक्लवासा गौरांगो मृतकुंभधृत् ३४
सिंहवक्त्रो नृसिंहस्तु नरदेहः केसरान्वितः नीलोत्पलाभो द्विभुजो गदाचक्रधरो न वेत् ३५
वायोन्यमे उभौ हंसदत्तात्रेयौ जटाधरौ योगिवेषौ सितौ दंडकमंडलुकरौ तथा ३६
उत्तरे केसरे व्यासं न्यसेद्गणपतिं ततः तत्र व्यासो विशालाक्षः कृष्णवर्णः सितांबरं ३७
द्विभुजो धृतवेदश्च स्तपिशंगजटाधरः सितयज्ञोपवीतश्च कर्त्तव्यः सपवित्रकः ३८

वाफदी १२६ सर्वेवक्त्रीयगणपतिखंडादौप्रसिद्ध मतोऽवतारमध्येतद्गणनं कृतमित्यवमेयम् ३७ ३८ गजास्यः श्र:२७

गजास्य एकदंतश्च रक्तो गणपतिर्भवेत् रक्तांबरधरश्चैव नागयज्ञोपवीतवान् ३९ तुं
दिलश्चचतुर्बाहुः पाशांकुशवरान्दधत् करेणैकेन वरदधत्स्यां पुस्तकलेखिनीम् ४०
न्यसेत्केसरश्रेण्यानेकपिलं पूजकस्ततः सनत्कुमारं च मुनिं नैष्ठिकब्रह्मचारिणम् ४१
शुक्लांगः कुटिलः कार्यो धृतचारुसितांबरः दधत्कराभ्यामंभोजमनयंशांतविग्रहम् ४२
पंचवार्षिकबालाभोदिग्वस्त्रोऽल्पजटाधरः सनत्कुमारश्च मुनिः कर्त्तव्यः पूजकेन तु ४३
संस्थाप्यकेसरेष्वित्थं देवताः पंकजस्य तु न्यसेच्चदलमध्येषु पार्षदानष्टकोष्टक ४४ वि
घ्नकीनं च गरुडं तत्रादौ पूर्वतो न्यसेत् ततो दक्षक्रमेणैव प्रबलं च बलं न्यसेत् ४५
मं कुमुदं कुमुदाक्षं च स्कनंदं मेव च भूतदेवं जयंतं च विन्यसेद्विजयं जयम् ४६ करिवदनः
रक्तोऽरुणांगः ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ॥

४७ ४८ दलानां प्रान्तिमध्यानि मध्यमागास्तेषां मंतरालेषु क्रमात्पूर्वाद्यनुक्रमेण ४९ ५० ५१ ५२

ततः शंखं चक्रं च पुष्करं तं च सात्त्वतम् द्वौ द्वावेवं क्रमेणैव स्थानेष्वष्टसु विन्यसेत् ४७
चतुर्भुजाः सर्वएते शंखचक्रगदाधराः कार्याः किरीटिनः श्यामाः पीतवस्त्राः सुभूषणाः
४८ दलमध्यांतरालेषु सिद्धीरष्टस्तु विन्यसेत् नानामंगलवाद्यानां वादने निपुणाः क्रमात्
४९ अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ईशिता वशिता चैवाष्टमी कामावसा-
यिता ५० एताः सुवर्णवर्णाभाः सर्वाभरणभूषिताः वेणुवीणादिहस्ताश्च कर्त्तव्याश्चित्रवा
ससः ५१ दलाग्रेष्वष्टसु ततो वेदाञ्छास्त्राणि च न्यसेत् तत्र वेदान्न्यसेद्दिक्षु शास्त्राणि तु विदि
क्षु सः ५२ पूर्वे न्यसेत्तु ऋग्वेदमक्षमालाधरं सितम् खर्वलंबोदरं सौम्यं पद्मनेत्रं सितांबरम् ५३
याम्ये न्यसेद्यजुर्वेदं मध्यमांगं कृशोदरम् पिंगाक्षं स्थूलकंठं च पीतं चारुणवाससम् ५४
तल्पाभविधिमेवविविच्याह पूर्वदलनिवासिनः खर्वेऽल्पकायम् लंबोदरं तुंदिलम् ५२ मध्यमं नातिदीर्घं नाति

वासु·टी
११७

रुस्तंचांगंशारीरंप्रयस्तम् ५४ ५५ ५६ वक्षोजमग्निवर्चसम् ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ अ·२७

अक्षसूत्रंकरेवामेदक्षेवज्रंचबिभ्रतम् पश्चिमेसामवेदंचप्रांशुमादित्यवर्चसम् ५
५ दक्षेक्षमालांवामेचधृतवंतंकरेवरम् स्वर्णवर्णंविशालाक्षंविन्यसेत्कायनोद्यतम्
५६ अथर्वाणंन्यसेत्सौम्येसितांगंनीलवाससम् वामेक्षसूत्रंदक्षेचखड्गांगंबिभ्रतंकरे
वक्षोजसंचनामात्राक्षंवयसास्थविरंतथा ५७ अग्निकोणेधर्मशास्त्रंन्यसेच्चकमलासन
म् श्वेतंचबिभ्रतंदोर्भ्यांमुक्तामालांतथातुलाम् ५८ दीर्घकेशानखंसांख्यंनैर्ऋतेतुदिलिं
न्यसेच्च जपमालांचदंडंचकराभ्यांबिभ्रतंसितम् ५९ न्यसेद्वायौततोयोगंस्वर्णवर्णंकृ
शोदरम् ऊर्ध्वन्यस्तकरद्वंद्वंस्वनासाग्रकृतेक्षणम् ६० पंचरात्रंतथेशानेधवलंवनमालि
न न्यसेत्कराभ्यांदधतमक्षमालांचलांगलम् ६१

दंडाग्निनिबद्धत्वंप्रत्येकैकैकविचक्षणा एवंकमंडलुंनित्यवि ६६ स्वस्थानान्स्वस्ववाहनारूढान् ६७

एषांचतुर्णांवामांसेश्वेतसूक्ष्मघनानिच कर्ण्यानितथाक्षीणिपद्मपत्रायतानिच
६२ अग्न्यारणामंतरालेषुमहर्षीन्स्वस्वयोषितः विन्यसेत्स्वगतोवेदान्पूर्वाग्नेयादितुक्रमात्
६३ मरीचिंकलयायुक्तमत्रिंचाप्यनसूयया श्रद्धयांगिरसंमात्कंपुलस्त्यंचहविर्भुवा ६४
गत्यायुक्तंचपुलहंक्रिययाचमहाक्रतुम् ख्यात्यान्भृगुमरुंधत्यावसिष्ठंसहविन्यसेत्
६५ द्विभुजाःसर्वएवैतेजटाश्मश्रुधराःकृशाः कार्यास्तपस्विनोदंडान्दधतश्चकमंडलून्
६६ पश्चाद्बहिर्न्यसेच्चाष्टौदिशासुविदिशासुच दिक्पालानिंद्रप्रमुखान्स्वस्थानान्स्वपारि
शम् ६७ प्राच्यामैरावतारूढंन्यसेदिंद्रंचतुर्भुजम् वज्रांकुशौवुजवरान्दधतंस्वर्णसन्निभ
म् ६८ कौशेयंनंरम्यवसनंनानालंकारशोभितम् शोणापांगंविशालाक्षंसर्वलक्षणलक्षितं ६९

 तन्यासविधिं विनञ्यदर्शयति प्राच्यामित्येकोनविंशत्या ६८ ६९ ७० ७१ चामीकरं कवर्णेन दिवपीन 



अग्निकोणे न्यसेदग्निं ताम्रवर्णं चतुर्भुजम् दधानं पाणिभिस्त्रैव शूलं शक्तिं स्त्रुचं
स्त्रुवम् ७० चतुःशृंके हेमरथे निषण्णं वायुसारथिम् त्रिनेत्रं धूम्रवसनं पिंग
श्मश्रुजटेक्षणम् ७१ यमं न्यसेद्दक्षिणतः श्यामं चामीकरांबरम् चतुर्भुजं
दंडखड्गपरशुपाशधारिणम् उन्मत्तमहिषारूढं नानाभूषणभूषितम् ७२
ऊर्ध्वकेशं विरूपाक्षं नैर्ऋतं नैर्ऋते न्यसेत् खड्गं पाशं च दधतं द्विभुजं नरवाह
नम् ७३ हरिश्मश्रुं धूम्रवर्णं परिवीतासितांबरम् हाटकानेकभूषाढ्यमवेक्ष्य
वनयंकरम् ७४ ततः प्रतीच्यां वरुणमिंद्रनीलमणिप्रभम् श्वेतांबरं चतु
र्बाहुं मुक्ताहारविभूषितम् ७५ मं बरं वस्त्रं यस्य तम् ७२ ७३ ७४ ७५ श्रीः २

७६ पृषस्थं हरिणारूढम् ध्वजिनं ध्वजपाणिम् ७७ ७८ वर्मिणमामुक्तकवचम् ७९ ८० अलिके

मकरं स्यारूढं दोर्भ्यां पाशं च बिभ्रतम् अन्याभ्यां रत्नपात्रं च शंखं च दधतं न्यसेत्
७६ वायौ वायुं हरिद्वर्णं द्विभुजं कृष्णवाससम् पृषस्थं मुक्तकेशं च व्याकोशास्यं ध्वजिनं न्यसेत्
७७ सौम्ये न्यसेत्कुबेरं च स्वर्णवर्णं चतुर्भुजम् गदाशक्तित्रिशूलानि रत्नपात्रं च बिभ्रतम्
७८ नीलांबरं श्मश्रुलं च शिबिकायां समास्थितं पिंगवामनयनं नैकभूषं च वर्मिणम्
७९ ईशाने यमसारूढमर्धनारीश्वरं न्यसेत् वामार्धे पार्वतीरूपं दक्षार्धे तत्र शंकरः
८० ईश्वरार्धे जटाजूटं कर्तव्यं चंद्रभूषितम् उमार्धे तिलकं कार्यं सीमंतमलिके तथा
८१ भस्मनोद्धूलितं चार्धमर्धं कुंकुमभूषितम् नागोपवीतं चाप्यर्धमर्धं हारविभूषितं ८२

जटाटेजटारमश्विकं गोधिरित्यभिधानात् सीमंतं केशवेषः पंक्तमार्गम् ८१ ८२ ८३ ८४ ८५ ८६ अशावि

निराकृकैलीरन्नेदविवक्षयोक्तम् स्पंदनान्निरषात् स्पंदनं तु स्तुतौ तीरे निनिशेनारयोस्त्रियामिति मेदिनी ८७
नदेवविन्यदर्शयतिपाभ्यामित्यादिना ध्यहप्रतिमाद्वयविशेषमाह याज्ञवल्क्यः नाम्नका स्फटिकाद्वक्तचंदनास्त्र

वामार्द्धं च स्तनः पीनः कर्त्तव्यः कंचुकीस्तनः कटुंवरज्ञनाहैमी पादेकांचननूपुरम् ८३ कौ
स्कंनं वसनं चैव करौ कंकणभूषितौ त्रिशूलमक्षसूत्रं च दधतौ रक्तमुद्रिकौ ८४ रत्नागर्भैररश
नासापीकार्यावस्त्रं गजाजिनम् करौ च नागवलयौ दर्पणोत्पलधारिणौ ८५ एवंविधं म
हादेवं न्यसेद्वृषभवाहनम् इत्थमष्टदिगीशानां कुर्यात्स्थापनमर्चकः ८६ पुराहहिस्तत
स्थाप्योस्थापयेदर्चको मदनान् स्वस्वदिक्षु स्थितान्स्वस्वान्यारूढान्स्पंदनान्विन ८७ प्राच्यांदिशि
न्यसेत्तत्र भास्करं पीतवाससम् सिंदूरवर्णं द्विभुजं पद्महस्तं रथे स्थितम् ८८ र्णकाद्वौरजतादयः
मीमात्कांस्यात्कार्यास्ग्रहाः क्रमात्स्ववर्णैर्वापि देलेख्यागंधैर्मंडलकेषु चेति सूर्यादीनां मूर्त्तयस्ताम्रादिभिर्यथाक्रमं कार्या
स्तदलाभे स्ववर्णैर्वर्णकैः पटे लेख्या मंडलकेषु वा गंधैरक्तचंदनादिभिर्लेख्या इमिताक्षरा ८८ ॥:
ति

८९॥ मास्येतु च्छयुपतिमा चतुर्भुजा प्युक्ता॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रक

एकं चक्रं द्वादशारं रथस्यास्याति तेजसः॥ सप्ताश्वाश्च हरिद्वर्णा वामे संनियोजिताः॥८९
आग्नेयकोणे न तः स्थाप्यो न गुः श्वेतः सितांबरः॥ दंडं कमंडलुं विभ्रद्द्विबाहुः सौम्यदर्शनः॥९०
चित्रवर्णध्वजदशाके स्थितो हेममये रथे॥ दक्षिणे च न्यसेद्भौमं रक्तांबरं तथा॥९१॥ चतुर्भुजं ग कंर
दाशक्तित्रिशूलवरधारिणम्॥ न्यसेद्धेमं रथं कुर्याद्रक्तणाष्टहयान्वितम्॥९२॥ राहुश्चनै
ऋत्ये कोणे नीलवासाश्चतुर्भुजः॥ करालास्यस्तमोरूपश्चर्मासिशक्तिशूलधृत्॥९३॥
न्नंगवर्णाष्टतुरगे स्थितः कार्यस्त्वयोरथे॥ सौरिश्च पश्चिमे स्थाप्य इंद्रनीलसमद्युतिः॥९४
धन्वी त्रिशूली द्विभुजो मंदाक्षश्चा सितांबरंगृ शातलाशाश्च संयुक्ते स्थितः कार्याय
सेरथे ९५॥ मंडलू इति॥९०॥९१॥९२॥९३॥ आयोरथे जो हमयस्यंदने॥९४॥९४॥९५॥९७ हरिद्वासा

अष्टदिंगात्पदनिमंधिराधः॥९८॥९९॥कर्णिकाद्यादिदेवानां पुरस्यां तावाह्य प्रदेशान्तरेतेषां नेत्रस्थानेषु 

वायुकोणेतत्पदंस्थापयेद्बसितांबरम्॥श्वेतवर्णंगदाहस्तंद्विभुजंचरथेस्थितम्॥
९६॥शातारचक्रत्रितयेस्पंदनेतस्यचाप्यये॥कुंदाभाःसंतुनयतोयोजितास्फुरगाश्च
९७॥उत्तरेद्विभुजःसौम्योवराभयकरोरुणः॥हरिद्वासाष्टदिग्गाश्वेकार्योहिमरथेस्थितः
९८॥ईशानेचगुरुःस्थाप्योहेमवर्णःसितांबरः॥द्विभुजःपपनयनोधृतदंडकमंडलुः॥पां
डुराष्टहयेहैमेनिषण्णःस्यंदनोत्तमे॥९९॥अंगदेवान्भगवतःस्थापयेदित्यमर्चकः॥
कर्णिकादिपुरांतांतस्थानेषुक्रमशोविलान्॥१००॥वासुदेवांगदेवानांन्यसेन्मूर्तीस्त
वैनची॥एणीफलानीनरस्तन्यसेत्पुष्पाक्षतादिवा॥१०१॥ १००॥वैनवीधनाढ्यः॥मूर्ती
र्यथाशक्तिस्वर्णरूप्यताम्रादिनिर्मित्ताःप्रतिमान्यसेत्॥इतरोनिर्धनस्तु॥१०१॥श्रीहरूः:-

॥इतिश्रीवासुदेवमाहात्म्यटीकायांवैष्णवच्छनायांसप्तविंशोध्यायः॥२७॥अमावर्चकः॥१॥२॥द्वार

॥इतिश्रीस्कंदपुराणेविष्णुखंडेश्रीवासुदेवमाहात्म्येक्रियायोगेष्टाममंडलरचनाविधिनिरू
पणंनामसप्तविंशोऽध्यायः॥२७॥श्रीनारायणउवाच॥ ॥अथवक्ष्याणिनायभ्यतनौमी
स्वस्थमानसः नमस्कृत्येष्टदेवादीन्देशकालौचकीर्त्तयेत् १ एकांतधर्मसिद्ध्यर्थंवासुदेव
स्यपूजनम् करिष्यइतिसंकल्प्यकुर्यान्न्यासविधिंततः २ न्यासेमंत्राद्वादशाक्षरोगाय
त्रीवैष्णवीतथा नारायणाष्टाक्षरश्चद्वेषो विष्णुषडक्षरः ३ एतेद्विजानांविहितास्त
दन्येषांत्विहत्रयः वासुदेवाष्टाक्षरश्चहरिपंचाक्षरस्तथा षडर्णःकेशवस्येतिन्यासेहो
मेचसंमताः ४ श्रीविष्णुप्रतिमांगेषुस्वांगेष्वितनतोविलान् कुर्यान्न्यासांस्तैर्मंत्रैस्ततो
र्चांवापसमाम्रजेत् ५ शाक्षरादयोमंत्राःप्रसिद्धाः १ वासुदेवस्याष्टाक्षरोनमोस्तुवासुदेवायेति हरेःपंचा

वासुन्दी १२१ शरीरस्थेन मरुता केशवस्य षडर्णः केशवाय नमः इति ४ अर्चां प्रतिमाम् वाससा सितसूक्ष्मवस्त्रखंडेन ५ अ०२९

कलशं वामभागे स्वे संस्थाप्यावाह्य तत्र च तीर्थानि गंधपुष्पाद्यैरुपचारैस्तमर्चयेत् ६
पूजाद्रव्याणि चात्मानं प्रोक्षयित्वा तदंबुना शंखं घंटां च संपूज्य भूतशुद्धिं समाचरेत् ७
आस्यंतराग्निवाय्वम्भोदग्ध्वा पापात्मकं वपुः शुद्धस्य स्वात्मनस्त्वैक्यं भावयेद्ब्रह्मणा स्थि
रः ८ ततोऽक्षरब्रह्मरूपो राधाकृष्णं हरिं प्रभुम् ध्यायेदनन्यमनसा प्राणायामं समाचरे
त् ९ अधोमुखं नाभिपद्मं कदलीपुष्पवत्स्थितं विनाश्यापानपवनं प्राणेनैक्यमुपानये
त् १० पद्मनालेन मानीय मरुतेन तदंबुजम् आकर्षेद्हृद्मध्यतल्लरत्तीव्रमुपैति रुत्

तं कलशम् ६ ७ नामेवाह्यमंतरेति आदौ कोष्ठगतवायुना शोषयित्वा तत्र आधारगतेनाग्निना दग्ध्वा पुनर्ल
लाटस्थचंद्रमंडलामृतप्लावनेन शुद्धस्य संपादितनिष्कल्मषामृतमयस्य शरीरस्य स्वात्मनो ब्रह्मणा सहैक्यं भावयेत् ८
९ १०

तमेकीकृत्यं पवनम् आनीय प्रापयित्वा तेन सह तदंबुजमूर्ध्वमाकर्षेत् अथानंतर क्षणेऽर्गवतस्यं तीव्रं
यथा भवति तथा तस्मात्संकुचत्वमसत् रुद्धदयमुपैति तत्र च हृदयावकाशे उत्तमस्त्रिःसरत्प्रकाशेन शो

प्रफुल्लति च तत्रैव हृदयाकाशमध्यतः ११ तेजोराशिमयं तत्र ततोऽप्यधिकतेजसा
दर्शनीयतमं शांतं ध्यायेच्छ्रीराधिकापतिम् १२ उपविष्टं स्थितं वा तं दिव्यचिन्मयवि
ग्रहम् ध्यायेत्किशोरवयसं कोटिकंदर्पसुंदरम् १३ रूपानुरूपसंपूर्णा दिव्याव
रा यवलक्षितम् शरच्चंद्रावलीगंसीर्वास्युजद्वयम् १४ आरक्तकोमलतलर
म्यांगुलिपदांबुजम् तुंगारुणस्निग्धनखद्युतिलज्जायितेंदुपम् १५ श्री

तमानं सम्यक्प्रफुल्लति विकाशमेति ११ तत्र प्रफुल्लांबुजे १२ १३ रूपानुरूपैरन्योन्यस्पर्द्धिमानसौं
दर्यैः संपूर्णैरन्यूनैर्दिव्यैरमायिकैरवयवैर्लक्षितम् शरच्चंद्रवदाह्लादकारीणि निर्मलानि वा अंगानि य

वासुदी स्पतम् दीर्घजानुपर्यंतमायतं तं चारुवृत्तं भुजद्वयं यस्य तम् १४ आरक्तैः कोमलैः तलयोः रम्या मनोहरा श्रु.२८
१२२ ङ्गुजयोर्ययोस्तथाभूते पदांबुजे यस्य तम् तुंगा उन्नतमध्या अरुणाः शोणवर्णाः स्निग्धा अरूक्षा
श्च येन रवास्तेषां शुत्या कांत्या लज्जापितो लज्जां प्रापितः उडुपश्चंद्रो येन तम् १५ शिंजंत्यः किंकि

शिंजत्किंकिणिमंजीरहंसकांघ्रियुगश्रियं ॥ सुवृ
त्तजंघायुगलं समजानूरुशोभनम् १५ श्रीः

वर्णाकरकी तयो घुर्घरिकायस्योस्तौ मंजीरौ नूपुरौ हंसकौ तैः मेषां वांघ्रियुगे श्रीर्यस्य तम् किंकिणिशब्देक
स्वत्वमार्षम् सुष्ठु वृत्तं वर्तुलाकृति जंघायुगलं यस्य तम् समाभ्यां न्यूनाधिकत्वरहिताभ्यां जा
नुभ्यामूरुभ्यां च शोभनम् १६ श्रीस्वामिनारायणाय नमः ॥

संयुक्तरुक्मानि रत्नानि यस्यां तया रशनया कांच्या आबद्धं यत्पीतांबरं तेन कटौ श्रीः शोभा यस्य तम् ऊक्षी
च नात्यंतोन्नातिनिगर्त्तमध्यभाग स्तुक्कुक्षिनाभ्यंतः तद्रुतुंगं तस्य निम्ना गंभीरा नाभिर्यस्य वलीनां त्रिधंग्रे
खाकाराणां मुदरावयवानां त्रयं यस्य सः नतस्त्रयीणां कर्मधारयः तम् बलिरेखस्मिन्नेदेव करचामरं
उद्योः उपहारेषु मात्स्वीतु उरस्या स्तनचर्माणि गद्गदारूपमेदेव जवरावयवे क्विते निमेदिनी १७ विततेवि

सत्कलरशनाबद्धपीतांबरकटिश्रियम् तुत्तुंगकुक्षिनाभ्यंतर्निम्ननाभिवलित्रयम् १७
विततोत्तुंगहृदयश्रीवत्सावर्त्तशोभितम् लंतीगुच्छगुच्छार्द्धदेवछंदादिभूषितम् १८

शालेउत्तुंगेवरुदयेवक्षसि श्रीवत्साख्यआवर्त्तोमहत्वसूचकः श्वेतरोमच्चमरविशेषस्तेनशोभितम् वद हिराकणि
तिमहत्वमितिवक्ष्यः स्वरचदिहमिकमिक्कविन्यः मस्तनिम पन्यथः श्रीयुक्तोवक्षः श्रीवक्षः उलंतीकिंचित्संब
मानकंकणा गुच्छगुच्छार्द्धदेवछंदाहारविशेषाः आदिशब्दग्रहणकावल्यादिहारस्तिरसंग्रहार्थस्तैर्भूषितम्

 ग्रैवेयकं कंठभूषा लंबनं स्याल्ललंतिकेत्यमरः द्वात्रिंशद्यष्टिको गुच्छार्द्धस्तत्त्वयष्टिकः शतयष्टिर्विदे 
 वच्छंदाख्यो हारस्तत्समस्ङ्निधरणिः १८ नानाविधा विचित्रगुंफनाः सुगंधिपुष्पाणां स्रजो यस्य स्वर्णनिं
तु मयं यज्ञोपवीतमस्यास्तीति स्वर्णयज्ञोपवीती मया सोमरवतम् उन्निद्रं प्रफुल्लं शोणपद्मं कोकनदं त

नानासुगंधिपुष्पस्रक्स्वर्णयज्ञोपवीतिनम् उन्निद्रशोणपद्माभकरकंकणभूषणम् १९ सूक्ष्मपर्वांगुलिद्योतन्नैकमण्डलमुद्रिकम् निनादयंतं मधुरं वेणुं सर्वमनोहरम् २० विपुलांसंगूढजत्रुं महावाक्कंगदद्युतिम् भ्रमत्सुगंधलुब्धालिझंकारिनवनस्रजम् २१

स्यानाकांतिरिवाभा यथोस्तयोः करयोः कंकणाख्यानि वलयसंज्ञखलादीनि भूषणानि यस्य तम् १९ सूक्ष्माणि पर्वाणि यासां तास्वंगुलिषु द्योतंतो द्योतमाना नैकान्यनेकाः मण्डलवर्त्तिता मुद्रिका ऊर्मिका यस्य तम् २० विपुलावंसौ स्कंधौ यस्य तं गूढे जत्रुणी कंठपार्श्वास्थिनी यस्य तम् महतो वाक्किकोरंगदाभ्यां केयूराभ्यां द्युतिर्यस्य तम् भ्रमद्भिः सुगंधलुब्धैरलिभिर्भ्रमरैर्झंकारिता नादिता वनस्रग्वनमाला यस्य तम् २१

कंबूपमे शंखवत्त्रिरेखांकिते गले कंठे भ्राजन् भ्राजमानो ग्रैवेयकैः कंठभूषणैः सहितः कौस्तुभो मणिर्यस्य तं २२ स्मितमुखत्वं स्मितं हास्यं तस्य कलालेशस्तया राजच्छोभमानं पूर्णचंद्रनिभमाननं यस्य तम् स्मितस्मिते

कंबूपमगलभ्राजत्स्वग्रैवेयककौस्तुभम् शोभमानहनुं बिंबीफलशोणाधरद्युतिम् २२ स्मितस्मितकलाराजत्पूर्णचंद्रनिभाननम् तिलपुष्पसमाकारदर्शनीयसुनासिकम् २३ समानकर्णविभ्राजन्मकराकृतिकुंडलम् कर्णोपरिलसच्चित्रपुष्पगुच्छावतंसकम् २४ समसूक्ष्मरदज्योत्स्नोद्यन्मंदस्मितश्रियम् पद्मपत्रायतारक्तप्रांतरम्यविलोचनं २५ सुतुंगललाटं चकामचापायितभ्रुवम् वक्रसूक्ष्मासितस्निग्धमनोहरशिरोरुहम्

निभाननः २३ समानयोः कर्णयोर्विशेषेण भ्राजंती भ्राजमाने मकराकृतिनी कुंडले यस्य तम् कर्णयोरुपरि लसंतौ चित्रपुष्पगुच्छावेवावतंसौ यस्य तम् २४ समानां परस्परतुल्याकाराणां सूक्ष्माणां वरदानां दंतानां

वा.म.टी.
१२५

ज्योत्स्नया कांत्या उल्लसनौ गंडस्थले यस्य सः श्रीर्यस्य तम् पद्मपत्रवदायते अर्थात् दीर्घे रक्तप्रांते रम्ये विलोचने यस्य अ.२८
तम् २५ २६ स्निग्धया प्रेमार्द्रया दृशा निजं जनं रक्तं वीक्षमाणम् २७ कौसुंभं कुंकुमं न पुष्परक्तम् अमलं वासो

नानारत्नोल्लसच्चित्रकिरीटधृतशेखरम् प्रेमणा निजं वीक्षमाणं प्रसन्नं स्निग्धया दृशा
२७ ध्यात्वैवं स्वरूपम् अथ तद्वामे राधां विचिंतयेत् द्विभुजां स्वर्णगौरांगीं कौसुंभं नामलवास
सम् २८ समकर्णोल्लसद्रत्नभूषणां शुकनासिकां किशोरीं मृगशावाक्षीं पीनोन्नत
घनस्तनाम् २९ कृशमध्यां पृथुश्रोणिं रत्नकांचीविभूषिताम् अनेकदिव्याभरणां
विकचाब्जाननस्मिताम् ३० रत्नांगुलीयकेयूरकंकणादिलसत्कराम् शिंजन्नूपुरमंजीर
शोभमानांघ्रिपंकजाम् ३१ यस्यास्ताम् २८ शुकस्य कीरस्य नासिका यस्यास्ताम् किशोरीं किशोरावस्थाम्
मृगस्य ~~बालमृगस्य~~ शावो अर्भकस्तस्याक्षिणी इव चले अक्षिणी यस्यास्ताम् २९ विकचं प्रफुल्लम् अब्जं पद्मं तत्
सदृशं आननं स्मितं यस्यास्ताम् ३० ३१

विशाले भाले विलसंती सत्काश्मीरं वा कुंकुमं तस्य तिलका ललाटाभरणं यस्यास्ताम्॥ वेण्यां केशपाशे
ग्रथिता मालतीपुष्पाणि यस्यास्ताम्॥ ३२॥ ३३॥ इति श्रीवासुदेवमाहात्म्यटीकायां वैष्णववल्लभनाम्न्याम

विशालभालविलसत्सत्काश्मीरललाटिकाम्॥ बिंबोष्ठीं स्फुरत्कपोलां च वेणीग्रथितमालती
म्॥ ३२॥ वीक्षमाणं प्रभुं प्रेमणा दधानामंबुजं करे॥ ध्यात्वैवं राधिकां तत्र प्रभुमर्चेत्तया सह॥
३३॥ इति श्रीस्कंदपुराणे विष्णुखंडे श्रीवासुदेवमाहात्म्ये क्रियायोगे श्रीराधाकृष्णस्वरूपध्यानानि
रूपणं नामाष्टाविंशोऽध्यायः॥ २८॥ श्रीनारायण उवाच॥ उपचारैर्बहुविधैर्मानसैः संप्रपूज्य
सः आवाह्य स्थापयेद्व्योम्नस्तौ स्थापनमुद्रया १ ततस्तदंगदेवांश्च तत्तन्मंत्रैः पृथक्पृ २
थक् आवाह्य नाममंत्रैर्वा स्वस्वप्रतिष्ठापयेच्च सः २ अष्टाविंशोऽध्यायः २८ मानसैः मनसः क
ल्पितैः तं श्रीराधाकृष्णम् प्रकर्षेण पूजयित्वा ततः आवाहनमुद्रया मूर्त्तौ प्रतिमायाम् आवाह्य स्थापनमुद्रया

वाक्ती स्थापयेत् १ २ ३ ४ ५ ६ सुगंधिपुष्पाणि मल्लिकाचंपकादीनि तैर्वासितेन पक्वतैलेन ७ पंचामृतस्ना अ०२९
१२५

घंटादिवादयेत्स्वाङ्कुर्यान्नीराजनालिकाध्वनिम् सुप्तोत्थितमिवार्घ्येनं कारयेद्दंतधावनम्
३ श्यामाकविष्णुक्रांताभ्यां दूर्वाब्जाभ्यां सहोदकं पाद्यमेतत्प्रभोर्दद्यात्ततोऽर्घ्याचमनीयके ४
चंदनाक्षतपुष्पाणि तिलाग्रानि जसर्षपान् यवान् दूर्वां चार्घ्यपात्रे निक्षिपेदंबुनान्वते ५
जातीफललवंगैलाकंकोलोशीरवासितम् दद्यादाचमनीयांबु ततः संस्नापयेद्धरिम् ६
सुगंधिपुष्पतैलेन कुर्यादभ्यंगमादितः ततः करत्रिफलकल्केन कुर्याच्चोद्वर्तनं ततः ७
क्षीरेण दध्ना चाज्येन मधुना सितया तथा स्नापयेद्धरिमभ्यर्च्य तन्मंत्रैः पृथक्पृथक् ८ सुगं
धिना चंदनेन स्नानमुष्णेन चांबुना तं कारयित्वा गंधाद्यैः स्नानपीठेऽर्चयेत्प्रभु ९

नमात् क्षीरेणेति ८ स्नानपीठे अभिषेकस्नानोचितपात्रे लघु सिंचितविधिना ९ श्रीसूक्तः

राजनाद्यैरित्याद्युक्तार्थेन रौहिणादिसाममहनम् महापुरुषविद्या जितंते पुंडरीकाक्षेत्यादि १० ११
तं श्रीसूक्तं तृतीयचरणेऽक्षराधिक्यं छांदसम् अभ्यासंकर्षणादीश्च १२ सांगायांगदेवतासहिताय

निर्माल्यपुष्पादि ततो विसृज्योत्तरतो द्विजः राजनाद्यैः सामभिर्वा महापुरुषविद्यया
श्रीसूक्तविष्णुसूक्ताभ्यामभिषेकं समाचरेत् १० नाम्नां सहस्रेण हरेरष्टोत्तरशतेन वा अ
भिषेकं तु कुर्वीरन्स्त्रियः शूद्रा अदीक्षिताः ११ ततः प्रमार्ज्य वस्त्रेण तमनर्घ्यांशुकानि च
परिधापयेद्द्वितीयेन गाधांचाभ्यां स्वशक्तितः १२ उपवीतं भगवते दद्यात्सूक्ष्मं सितं शुभ
म् रत्नहेमाद्यलंकारान् सांगायास्मै च धारयेत् १३ यथाऋतु यथास्थानं चंदनेन प्रयोजितं

द्वितीयाचतुर्थ्या १२ यथाऋतु यस्मिन्नृतौ शिशिरग्रीष्मादौ यादृशमुचितम् यथास्थानं च यस्मिन्स्थाने ल
लाटादौ यादृशमुचितं तत्तादृशं तिलकमनुलेपनं च चर्चितं केसरेण घनेन कर्पूरेणाचादिशब्दात्कस्तूरी

वासुदी
१२६

दिनाचसहितेनचंदनेनकुर्यात् तृतीयचरणेक्षराधिक्यमार्षम् १४ १५ तुलस्यामंजरीभिर्दलैःपत्रैश्च (
नमःशब्दःप्रांतेयस्याःसाचतुर्थीविभक्तेरंतेयस्यतदेवंनाम विष्णवेनमइत्यादि १७ सुगंधिद्रव्यचू
र्णानिचीरादीनिदशांगममृतादिमंतधूपंवाकृत्वीतघ्राणतृप्त्याह्लादनंतादिधूपस्यलक्षणम् दशांगामृतधूपयो

तिलकानुलेपनंकर्पूरकेसरघनादिना १४ यथोचितमलंकाराभ्यांधारयित्वाचराधिकाम् पत्र
लेखांचतिलकंविरध्यात्कुंकुमाक्षतैः १५ अर्घदर्शादर्शयित्वाथधूपस्रक्तेरवरादिभिः पूजयेत्तं
महत्वेणतुलसीमंजरीदलैः १६ तुलस्यावाथधूपेणप्रत्येकंनामवैष्णवम् नमःप्रांतचतुर्थ्यंतं
कीर्तयेन्नर्चयेत्प्रभुम् १७ सुगंधिद्रव्यचूर्णानितनःसौनाम्यवंतिच समर्प्यधूपंकृत्वीतदशांगंवा
मृतादिकम् १८
लक्षणमुक्तंनविष्णोत्तरे पद्मागकुष्ठंद्वियुणो गुडश्चलाक्षाचयंपंचनखस्यनागाः हरी
तकीसर्जरसःसमांसीनागैकमेकंत्रिलवंशिलाजम् घनस्यचत्वारिपुरस्यचैकोधूपोदशांगःकथितोमुनींद्रैः
सर्जरसोराळःइतिप्रसिद्धः मांसीजटामांसीत्रिलवंत्रिभागम् घनःकर्पूरःपुरोगुग्गुलुःतथा अगुरुचंदनंमुस्ता॰

सिह्लकंहरणोतथा समसामांतुकर्तव्यंधूपोयममृताव्हयइति सिह्लकंसिह्लाइतिप्रसिद्धंहरणाकस्तू
री १८ महानैवेद्यंपकान्नादि १९ नदेवाहसंध्यावेति चतुष्पद्यांचतुरंगपीठे २० मुहूर्तार्द्धंगतइति विघ्न

दीपंघृतेनकृत्वीतवर्त्तिकाद्वयदीपितम् कृतंस्वशक्तितःशुद्धंमहानैवेद्यमर्पयेत् १९ सं
यावपायसापूपशष्कुलीखंडलड्डुकान् पूरिकाःपोलिकामोदमोदनंव्यंजनानिच दधि
दुग्धघृतादीनिचतुष्पद्यांनिधापयेत् २० भोजयेत्तंततःप्रेम्णामध्येपानीयमर्पयन् मुहूर्त्ता
८ र्द्धंगतेदद्याद्धस्तप्रक्षालनांबुच २१ उच्छेषणंभगवतोविष्वक्सेनादिदेवताः उपकल्प्यास्ततःस्था क
प्यस्वार्पयेत्तद्भुवमामृजेत् २२
सहस्रनामस्तोत्रपाठावधिभोजयेदितिवैष्णवाः २१ उच्छेषणमु
च्छिष्टम् विष्वक्सेनादिदेवताःविष्वक्सेनादिपार्षदेभ्यः उपकल्प्यनिवेद्य ततस्तद्भगवत्पात्रमादिकंस्था
र्यमन्यतोन्यत्रस्थाप्यस्थापयित्वा भुवंमन्नेनैवेद्यचतुष्पदीनिहितानांभुवमामृजेत्मार्जयेत् २२ ॥

वासुदे
१२१

तांबूलवीटिकालक्षणं मुखवासम् २३ २४ २५ २६ २७ अष्टांगपंचांगप्रणामयोर्लक्षणमाह पद्भ्यामिति द्वा अ० २९

मुखवासं ततो दद्यात्कृत्वा तांबूलवीटिकाम् एलाकर्पूरलवंगैर्जातिजातिसमन्विताम् २३
फलं च नालिकेरादि दत्वा शक्त्या च दक्षिणाम् महानीराजनं कुर्याद्गीतवादित्रपूर्वकम् २४
स्तुयात्पुष्पांजलीन्दत्वा तस्मै चैव ततः नामसंकीर्तनं कुर्याज्जायन्नृत्यंश्च तत्पुरः २५
मुहूर्त्तं सविधायैवं कृत्वा चैव प्रदक्षिणाम् प्रणामं दंडवत्कुर्यात्तिर्यक्कृष्णस्य भुवि २६
अष्टांगं वापि पंचांगं प्रणामं प्रकृष्टं प्रचरेत् पंचांगमेव नारी तु नाम्ना मुनिसत्तम २७ प
द्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा वचसा मनसा चेति प्रणामोऽष्टांग ईरितः २८ बा
हुभ्यां चैव मनसा शिरसा वचसा दृशा पंचांगोऽयं प्रणामः स्यात्पूजासु प्रवराविमौ २९ नीतं मां
संस्मनेः पाहि प्रपन्नं त्वां प्रनोरति ततः संप्रार्थ्य स्वाध्यायं शक्त्या कुर्वीत नैत्यकम् ३०

भ्याम् २८ २९ नैत्यकं प्रतिदिनं कर्तव्यं तया विद्दिनं स्वाध्यायम् यथाशक्ति वेदपुराणस्तोत्रादिपाठम् ३०

शेषां निर्माल्यम् तद्दत्तां तेन भगवता दत्तेति ध्यात्वा ३१ ३२ ३३ ३४ दैवतानां ब्रह्मादीनामपीप्सितम् ३५

ध्यात्वा शेषां च तद्दत्तां गृहीत्वा शिरसा भरात् आवाहितं यथा पूर्वं राधाकृष्णं हृदंबुजे सं
स्थापयेत्तांगदेवान्स्वस्वस्थानं विसर्जयेत् ३१ करंडके वा शय्यायां मंदिरे प्रतिमां हरेः शा
ययित्वा विधाय पूजां वैष्णवं देवं समाचरेत् ३२ ग्रामादिकं हरेरन्नं स्वपोष्येभ्यो विभज्य सः स्वयं
भुक्त्वा तत्कथाद्यैर्हि दिनमशेषमतिक्रमेत् ३३ महापूजाविधानेन प्रोक्तेनानेन योन्वहम्
तत्कृष्णमर्चयेद्दिष्टुं सत्र वै तत्सपार्षदः ३४ दिव्यं विमानमारुह्य नाम्बरं देवतेप्सितम्
गोलोकाख्यं हरेर्धाम दिव्यं गोप्याति पूजकः ३५ फलानि संधिनाथापियस्त मर्चेद्दिने दिने
सोपि धर्मं काममर्थं मोक्षं चाप्नोत्यनीप्सितम् ३६ इत्थं पूजाविधिं कर्तुमशक्तो राधयाप्सह
हरिमेकं यथालब्धैरर्चेत्कृष्णोपचारकैः ३७

निष्कामस्य पूजाफलमुक्त्वा सकामस्य तदाह फलेति ३६

हरि० १२८ एकमंगदेवतास्थापनविधिरहितं यथातथा ३७ द्विजइति द्विजातिरप्यनधीतवेदादिर्महाशूद्रोऽकर्तुमश श्रु० २९
क्तोवाऽन्यइति महाशूद्रनाशक्तोवेलवः स्त्रीशूद्रादिश्च ३८ ३९ अन्यकृतालयेऽन्येन स्वेतरेणकेनापि

द्वादशाक्षरमंत्रेण द्विजोऽन्योनाममंत्रतः श्रीराधाकृष्णमभ्यर्चेद्भक्तिरेवात्र सिद्धिदा ३८
एकादश्यां हरेर्जन्मोत्सवादौ तु विशेषतः महाशूद्रैश्च कर्त्तव्यास्त्वशक्त्या तिलवेलवैः ३९
प्रतिष्ठामात्रमपि यः कुर्यादन्यकृतालये ससार्वभौमराज्यं वै प्राप्नुयान्नष्टकिल्बिषः ४०
कारयेन्मंदिरं रम्यं धनाढ्यश्च हरेर्दृढम् यः सतु प्राप्नुयाद्राज्यं त्रैलोक्यस्याप्यकंटकम् ४१
वृत्तिदानेन पूजायाः प्रवाहं वर्द्धयेत्तु यः सपुमान्प्राप्नुयान्नूनं विष्णुलोके महत्सुखम् ४२
प्रतिष्ठां मंदिरं पूजां कारयेत्त्रीण्यपिहि यः समानैश्वर्यमाप्नोति वासुदेवस्य सध्रुवम् ४३

कारिते स्वालये मंदिरे प्रतिष्ठामात्रं यथाशास्त्रं भगवत्प्रतिमास्थापनमेव ४० मंदिरं मंदिरमात्रमपि ४१ ४२
४२

४४ ४५ तत्त्वरणात्मनां भगवदधीनतयैव वर्त्तमानानाम् ४६ अन्यस्य तु नेष्टसिद्धिरित्याह विषयाविति लभे
त्तनेन जोहसंपरस्यैपरम् ४७ ततस्तस्माद्धेतोः ४८ क्रियायोगस्यैवैकांतिकभक्तिफलकत्वात्सर्वसाधनतः

हरेर्वृत्तिं हरेद्यस्तु कृतां स्वेनैरेण वा कल्पमेकं स वै भुंक्ते नरके यमयातनाः ४४ कर्त्ता कार
यिता यश्च महायश्चानुमोदकः चतुर्णां हि फलं भागः स्कृतमस्येतरस्य च ४५ इति क्रियायो
गविधिर्यथा नारदकीर्त्तितः येनैकांतिकधर्मेत्र सिद्ध्येत्तत्त्वरणात्मनाम् ४६ विषयां
श्चिनयं श्चित्ते बहिः पूजां हरेश्चरन् संसारेणापि महता नयथोक्तं फलं लभेत् ४७ इतस्ततो म्या
म्पकर्त्तवेन्नमस्त्रीयं मनस्ततः नियम्य विष्णुपूजायां मुमुक्षुः प्रयतो भवेत् ४८ महाव्रताव्रतिनपति ग्र०
नोपिस्वधीनवेदाश्चापि बुद्धिमंतः सांख्यं च योगं परिशीलयंतः सिद्धिं न यांत्येव विनार्चनं हरेः ४९

श्रेष्ठमाह महाव्रताइति महाव्रतमस्त्येषामिति महाव्रताः अर्जुनादिभ्योच महाव्रतं स्मृत्यामास भगवान्

नंजलिः॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥ जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रत 
मिति॥ विवृतं चैतद्भगवता भाष्यकारेण बादरायणेन॥ तत्राहिंसा जात्यवच्छिन्ना मत्स्यबंधकस्य मत्स्येष्वेव ना
न्यत्र हिंसेति॥ देशावच्छिन्ना न तीर्थे हनिष्यामीति॥ सैव कालावच्छिन्ना न चतुर्दश्यां न पुण्येहनीति॥ सैव त्रिभि
रुपरतस्य समयावच्छिन्ना देवब्राह्मणार्थे हनिष्यामि नान्यथेति प्रतिज्ञया॥ एभिर्जात्यादिभिरनवच्छिन्ना अ

॥इति श्रीस्कंदपुराणे विष्णुखंडे श्रीवासुदेवमाहात्म्ये क्रियायोगे श्रीवासुदेवपूजाविधिनिरूपणना
मैकोनत्रिंशोध्यायः २९॥ हिंसादयः पालनीयाः एवं मेने सर्वत्र भिक्षुसर्वविषयेषु सर्वथैवाविदित
व्यभिचाराः सार्वभौमा महाव्रतमित्युच्यत इति परिशीलयंतो नित्यं संयमानाः अपि सिद्धिं स्वानिष्टफ
लंम् ४९ निर्मथ्य सर्वशास्त्राणि येन स्वप्राप्तिसाधनम् प्रकाशितः क्रियायोगस्तस्मै भगवते नमः
१ इति श्रीवासुदेवमाहात्म्यटीकायां वैष्णववल्लभनाख्यायामेकोनत्रिंशोध्यायः २९ श्रीरस्तु:

इत्थं मनो नियम्य कृतं संतमेवेष्टफलदमिति॥१॥ एकेनैकाग्रेण॥२॥३॥ तं मनोनिग्रहम्॥४॥५॥ शत्रुवत्

॥स्कंद उवाच॥ वासुदेवार्चनविधिं निशम्येत्थं स नारदः॥ प्रसन्नः पुनरप्राक्षीत्तं मुनीनां परं गुरु
म्॥१॥नारद उवाच॥ सम्यगुक्तो भगवता क्रियायोगो महाफलः॥ एकेन मनसा यो सौ कार्यः
सिद्धिमभीप्सुभिः॥२॥ मनसो निग्रहस्तत्र ज्ञानिनामपि सुदुरो दुष्करः किंपुनस्तर्हि नृणां क
र्मात्मनां भुवि॥३॥ तस्मात्तेतु हरेरर्चा नातीष्टफलदायिनी॥ अतस्तन्निग्रहोपायमपि मे वक्तु
मर्हसि॥४॥स्कंद उवाच॥ इत्यापृष्टः स मुनिना मुनींद्रः सर्वदर्शनः॥ नारायणो नरसखो ना
रदं तमभाषत॥५॥श्रीनारायण उवाच॥ सत्यमेव मुने वक्षि मनसो स्ति बलं महत्॥ जितेपि
यस्मिन्विश्वासः शत्रुवन्नविवेकिनाम्॥ ६ तावेव विवेकिपदग्रहणादविवेकिनस्तु न हि विश्वासे
न तत्र ज्ञानवंतीति भावः॥ ६ निर्दोषं कामक्रोधादिदोषरहितं मनः शाम्यति चांचल्यं जहाति ७ यतो

वासुदे यस्माद्धेतोः अदान्तोऽदम्योऽयं स्वैरगानन्मनोऽश्वस्तस्माद्धेतोर्मनस्विनो वैराग्ययुक्तं निर्वैराग्यवद्भिः प्र अ॰ ३०
१३० कृष्टैः कर्तृभिः सद्भिरुपायैः करणैर्नि गृह्यत इत्यर्थः ८ उपायास्तपश्चर्यादयः ९ अष्टांगान्यनुक्राम

मनस्यासत्क्रशोऽन्यस्तक्रशानुर्नास्ति वदेहिनाम् विष्णुध्यानाभ्यासयोगान्निर्दोषं तद्धि शाम्यति ७ अदान्तोऽश्ववदेवैनद्धनोऽस्ति कुरवग्रहम् अतो वैराग्ययुक्तं निःसदुपायैर्निगृह्यते ८ उपायास्तत्र बहवः संति निष्ठ विमलमते अष्टांगयोगस्याभ्यासः श्रेष्ठः सद्यः फलप्रदः ९ यमाश्च नियमाश्चासनप्राणायामसंयमः प्रत्याहारो धारणा च ध्यानमंगं तु सप्तमम् समाधिश्चाष्टमं प्रोक्तं योगस्यानुक्रमेण वै १० तत्राहिंसा ब्रह्मचर्यं सत्यास्तेयापरिग्रहाः

नियमाः इति योगस्य निर्विकल्पसमाधिलक्षणस्यांगमित्यन्वयः १० अहिंसादिलक्षणानि प्रागेवोक्तानि अपरिग्रहस्तु विषयाणामर्जनरक्षणक्षयसंगहिंसादिदोषदर्शनादस्वीकरणम् पंचैतेयौ

गशास्त्रानुसारेणोक्तम् अत्रादितोऽहिंसाग्रहणं तस्याएव सकलैकांतिकधर्मसाधनबीजत्वसूचनार्थम् तथाह्युक्तं सूत्रभाष्ये सर्वखल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्तमानस्तामेवावदातरूपामहिंसां करोतीति ११ १२ आसनमितिक

एते पंच यमाः प्रोक्ताः साधनीयाः प्रयत्नतः ११ शौचं तपश्च संतोषः स्वाध्यायो विष्णुपूजनम् एते च नियमाः पंच द्वितीयांगतया मताः १२ परिहार्यांगचांचल्यं यथासुखं यथा स्थितिः तदासनं स्वस्तिकादि प्रोक्तं हठाग्निजिन्मुने १३ चरतां सर्वतोऽस्त्रनामेकदेशे तु धारणम् गुरूपदिष्टरीत्यैव प्राणायामः स उच्यते १४

रणे ल्युट् स्वस्तिकलक्षणमुक्तं योगशास्त्रे ऊरुजंघांतरा धायपादाग्रे जानुमध्यगे योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः इति आदिशब्दात्पद्मादिग्रहणम् हठस्य हीनो ऽग्निर्जाठराग्निं यो जयतीति तथोक्तम् ततो ऽनभिघात इति पातंजलसूत्रात् १३ १४ हरिः

वासुदी॰ सुदेशलक्षणमुक्तं श्वेताश्वतरोपनिषदि समे शुचौ शर्कराविह्निवालुकाविवर्जिते शब्दजलाशयादिभिः अ॰ २०
१३१ मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेदिति निरुद्धपावपिंगलाया वा नाड्या बाह्यवायोरं

चले वायौ चलं चित्तं स्थिरे तस्मिन्स्थिरं ततः स्वदेशोयं समराऽभ्यस्यः पूरकुंभकरेचकैः १५ मन
सेंद्रियवृत्तीनां तत्तद्विषयतस्ततः आकर्षणं प्रतीचीनं प्रत्याहारः स ईरितः १६ नाभ्याद्य
न्यतमस्थाने प्राणेन सहचेतसः वासुदेवस्वरूपे यद्धारणं धारणेदिता १७ एकैकावय
वस्यैव चिंतनं यत्पृथक्पृथक् पदाब्जादेर्भगवतस्तद्ध्यानमिति कीर्तितम् १८ निरोधः प्रा
णमनसोरतिप्रेम्णा हरौ तु यः स समाधिरिति प्रोक्तो योगिनां मनिवांछितः १९ तः पूरणं पूर

पूरकः तस्यांतरेचस्तंभनं कुंभकः यथा पूरकः कृतस्ततोप्यशावहिस्तंभिःसारणं रेचकस्तैः १५ प्रतीचीनं
प्रतिलोमम् १६ नाभ्याद्यन्यतमस्थाने आधाराद्यन्यतमचक्रे यद्धारणं साधारणा देशबंधश्चित्तस्य धारणेति योगभा
ष्याव १७ १८ १९

सिद्धे योगसिद्धिः प्राणोयः सद्गुरुस्तस्मात् २० एतादृशमष्टांगयोगस्यामतुल्यम् २१ २२ आयास्यंतम
न्तम् अंतकालं मर्तुं विदित्वा प्राणघोषाश्रवणादिचिह्नेन निश्चयः तथा च श्रुतिः अयमग्निर्वैश्वान

अंगैरष्टभिरेतैर्हि शिक्षितैः सिद्धसद्गुरोः योगः सिध्यति वै पुंसां समाधेः फलात्मकः २०
नैतादृशं परं सम्यग्ज्ञानो निग्रहसाधनम् पुरुषाणां मुमुक्षूणामिति जानीहि नारद २१
तपस्विनां महाशास्त्रैर्वसांड क्षोनकादपि महत्वान्न यथा किंचिद्योगिनस्त्वस्ति कर्हिचित्
२२ आयास्यंतं विदित्वैव स्वांतकालं च योगवित् स्थानं चैणेव देहं स्वं त्यजतीत्थं समाधिना २३
पार्ष्णिभ्यां गुदमापीड्य वायुं पादद्वयस्थितम् शनैः शनैः समाकृष्य मत्पुरस्थानं नयन्नमुं २४

रोयोमंतः पुरुषो येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेनत्कर्णावपिधाय शृणोति स यदो षो
दोत्क्रमिष्यन्भवति नैनं घोषं शृणोतीति इत्थं वक्ष्यमाणप्रकारेण समाधिना २३ मत्पुरस्थानं मूलाधारस्वक्रम

२४ प्रजापतेः स्थानं स्वाधिष्ठानचक्रम् २२ नाभिं मणिपूरकचक्रम् हृदयमनाहतचक्रम् उरःकंठमि
त्युरस्थारम्भकंठपर्यंतं विशुद्धिचक्रम् भ्रकुटिमाज्ञाचक्रम् २६ तत्रस्वतंत्रतातयोः प्राणादिनिरोधविसर्ग

मत्तमाकेशावंध्यायंस्तन्मतुं चषडक्षरम् जपंस्ततोमुं नयतिवायुंस्थानं प्रजापतेः २५ ततो
नाभिंचहृदयमुरः कंठंचयोगवित् नयतिस्त्रकुटिंवायुंवासुदेवपरायणः २६ एतेषुषट्‌सु
स्थानेषुत्वेकैकस्मिन्पृथक्पृथक् योगीप्राणमनोक्षाणांनिरोधंचविसर्जनम् तावदस्यस
तिस्वस्ययावत्स्यात्तत्स्वतंत्रता २७ जितंजितंविहायैवस्थानंयातिपरंपरम् प्रासस्यस्थान
कंषष्ठंतदस्मात्प्रेष्यमोनहि २८ सप्तछिद्राणिरुद्ध्वाथप्राणमक्षमनोयुतम् प्रापय्यतालुंब्रह्म
निवस्यरंध्रंसयोगवित् २९ योःस्वतंत्रतानवेत्तावत् २७ जितंजितमितियस्मिन्यस्मिन्स्थानेस्वस्यप्राणादिनि
रोधविसर्गयोः स्वातंत्र्यंज्ञानंतवेत्तत्तत्स्थानंविहाय २८ नासाक्षिकर्णाछिद्राणिमुखंचेतिसप्तछिद्राणिरुद्ध्वास्वके

गुदमेढ्रनाभिहृत्कंठभ्रूमध्यं

३०॥ दिव्योनिर्विकारोविप्रदेहोमूर्त्तिर्यस्यसः॥ नतस्यरोगोनजरानमृत्युःप्राप्तस्ययोगाग्निमयंशरीरमिति

मायामयपदार्थानांततोदिव्यैववासनाः॥ सवासुदेवैकमनास्त्यजतिस्वकलेवरम्॥ ३०॥ ततो
भगवतोधामश्रीकृष्णस्यतमःपरम्॥ उपेत्यसेवमानस्तंनंदतिदिव्यविग्रहः॥ ३१॥ इतितेक
थितोब्रह्मन्योगशास्त्रस्यसंग्रहः॥ जित्वानेनमनःस्वीयंतमाराधयसर्वदा॥ ३२॥ ॥इतिश्री
स्कंदपुराणेविष्णुखंडेश्रीवासुदेवमाहात्म्येऽष्टांगयोगनिरूपणंनामात्रिंशोऽध्यायः॥ ३०॥
॥स्कंदउवाच॥ श्रुत्वैतत्सकलंधर्म्यंयथावद्भगवद्वचः॥ निःसंशयोमुनिःप्राहतंप्रणम्यकृ
तांजलिः॥ १॥ नारदउवाच॥ नष्टामेसंशयाःसर्वेप्रसादाद्भगवंस्तव॥ वासुदेवस्यमाहात्म्यंम
याधिगतमंजसा॥ २॥ किंचित्कालमिहैवाहंतपःकुर्वंस्त्वयासह स्थास्येत्वद्ध्यानमित्युक्त्वातानारदिकृशिष्यैप
कमात्मनः

श्रुतिः नंदतिनंदति ३१ तेनयोगेन तंश्रीकृष्णम् ३२ इतिश्रीवासुदेवमाहात्म्यटीकायांत्रिंश

वासुदे· वत्सनाथ्यां त्रिंशोऽध्यायः ॥३०॥ १२ ज्ञानादिषट्कंस्तस्य देवपञ्चकं करिष्ये ॥३ ४॥ तत्र धर्मादि ॥ ५ ॥ आत्मेति वक्ष्ये अ·३१
१३३

॥स्कंद उवाच॥ इत्युक्त्वा नारदस्तत्र तेनैवाप्यनुमोदितः ॥ उवास दिव्यवर्षाणां सहस्रं सततं पश्य
न् ॥४॥ श्रुत्वा वचांसि विमलं यथाकालं हरेर्मुखात् ॥ धर्मज्ञानाद्युपायपञ्चकं तं तत्र योगिराड्
५॥ स्नेहं च परमं प्राप्य श्रीकृष्णेऽखिलात्मनि ॥ गुणगानपरो नित्यमासन्नागवतान्वयणीः ॥६॥ न
त्वा निष्ठां परां प्राप्य स मत्वा तं सिद्धयोगिनम् ॥ उवाच भगवान्प्रीतः श्रेयस्कृत्सर्वदेहिनाम् ॥७॥ श्री
नारायण उवाच ॥ सिद्धोऽसि त्वं महर्षे द्राग्गच्छ लोकहितं कुरु एकांतधर्मं सर्वत्र प्रवर्त्तयितुम
र्हसि ॥८॥ स्कंद उवाच ॥ इत्याज्ञां शिरसा तस्य स आदाय जगद्गुरोः गच्छंस्ततस्स मस्तोषीत्प्रण
म्य प्रांजलिः स्थितः ॥ ९ ॥ नारद उवाच ॥ नमो नमस्ते भगवन् जगद्गुरो नारायण प्राकृतदिव्यमूर्ते

त्वर्थे व्ययम् ६ ७ ८ ९ दिव्यास्त्वानां महस्त्रेणामहद्रूपेणेन निश्चितम् नारदो हरिमाहात्म्यमाविष्कुर्वन्नुनावतं

प्रीतनरो विप्रसन्नः सदा निरंतरमेव स्याः नत्याः अत्रस्कन्नोक्त्वं च विष्णुत्वमत्यपाद्यार्थम् १० वासुदेवत्वा टिक
द्यर्थमाह जगन्निवासः इति तथा चोक्तं महाभारते वासुदेवा त्रिजगद्विष्णुं सत्त्वा सर्वदेवो भुविः सर्वस्त
निवासश्च वासुदेवस्ततो ह्यहमिति योगेश्वराणामीशः स्वामिन् उपशमेन निर्गुणेन निष्ठतोनिनयाम

अनंतकल्याणगुणाकरस्त्वं दासेमयि प्रीततरः सदा स्याः १० त्वं वासुदेवोऽसि जगन्निवा
सः क्षेमाय लोकस्य तपः करोषि योगेश्वरेशो यशमस्य आत्मारामाधिपस्त्वं परहंससद्गु
रुः ११ विभुर्ऋषीणामपनोऽक्षरात्माजीवेश्वराणां च नियामकोऽसि साक्षी महापूरुष
आत्मनं त्रः कालो न वध्यङ्कुर्रे महांश्च १२ तः आत्मारामाणां ब्रह्मनिष्ठानामधिपः उपास्यः परहंसानां
सनकादीनां सद्गुरुर्नैष्ठिकवसिष्ठस्त्यर्थः ११ विभुर्विश्वव्यापकः ऋषीणां महर्षीणामिति महत्त्वाणामर्द्धमं श्रिनाम
यनः स्वजनीयः साक्षी अंतर्यामी महापुरुषो मूलप्रकृत्यधिष्ठाता यस्य तव कुर्वेः सकाशान्महानासंतिक

वासुदे प्रलयकर्त्ता १२ मायापुरुषात्मना प्रधानपुरुषरूपेण तथाप्यकर्त्ता निष्कृत स्वदुःखासंसर्गात् अत एव श्री १९
१३४ निर्गतः तमासदा स्वदुःखयोर्वै तस्मात् सुखमिति श्रुतेः १३ ब्रह्मन् तैरात्मनिर्जितैर्वैरपि विजितेष्वेणाचिंत्या

सर्गादिलीलां जगतां त्वमीश करोषि मायापुरुषात्मनैव तथाप्यकर्त्ता ननु निर्गुणोसि
त्वमापरब्रह्मपरात्परश्च १३ यस्यः स्वयं ज्योतिरतर्क्यशक्तिस्त्वं ब्रह्म तत्तात्मविचिंत्यमू
र्त्तिः इदृद्व्रताचार्य महामुनींद्र कंदर्पदर्पापहर प्रताप १४ तपस्विनो ये रिपवः प्र
सिद्धाः क्रोधोरलोभस्मरलोभमुख्याः त्वय्याश्रमं ते पि कदापि वेष्टुं नेमं क्षमाद्धे
पनवप्रतापः १५ छंदोमयो ज्ञानमयो मताख्या धर्मात्मको धर्मसर्गत्रियो ह्य

मूर्त्तिर्यस्य सः इदृद्व्रताचार्य नैष्ठिकब्रह्मचर्यप्रवर्त्तक १४ कदापीति कश्चिदपि जनश्रीमत्वर्यं त्वय्याश्रमं त
रंगतवत्पद्यीत्यर्थः आश्रममपीशद्वात्तत्रत्यजीवशरीरेप्रवेशास्तदूरतोपास्ताः १५ छंदोमयो वैदिककर्मप्र

धानः ज्ञानमयः सांख्यादिज्ञानशास्त्रसिद्धांतबोधकइत्यर्थः अमृताख्यात्यात्यंतिकमोक्षवर्त्मतः धर्मा
त्मकएकांतिकधर्माश्रयः धर्मसर्गस्य ज्ञानवैराग्यादेरन्नितः पोषापोषकः उन्मूलितो मूलाद्गुत्पाटितः

उन्मूलिताधर्मसर्गो महात्मा त्वमक्षयश्चाक्षयोभक्तबंधुः १६ निर्दोषरूपस्य न वाखिलाः
क्रियास्त्रवंति वै निर्गुणनिर्गुणस्य धर्मार्थकामेष्वपि रिचनीयस्त्वमीश्वरेणापमुमुक्षुभिश्च
म १७ त्वं कालमायायमतस्मृतिस्पो महान्यवान्यातुमेकः समर्थः नक्ता परा धानन वेक्षमाणो
महादयालुः किल भक्तवत्सलः १८ धृताव नारस्य हिनाममात्रं रूपं च वाचः स्मरेदंतका
ले सोपि प्रज्ञोघोरमहाघसंघात्सद्यो विमुक्तो दिवमाप्नुयाति १९ श्रीनरनारायणाय

अधर्मसर्गोदंभादिर्येनसः अव्यक्तस्याः वेननवर्गस्यापिविबंधुश्चेनयितेत्यर्थः १६ १७ कालादिभ्यो
भक्तमहद्भयंतस्मात्पातुं रक्षितुं त्वमेवैकः समर्थोसि १८ दिवं वैकुंठलोकम् १९ त्रिधा नीवानपित्तक

कमये मायया नवैनिशेष: २० नाकसंस्था:स्वर्गलोकवासिनइंद्रादयोपि २२ त्रिलोकस्था:ब्रह्मलोकवासिनो
सर्वेषामपिलोकानामित्यर्थ:सुखाय स्वकस्वप्राप्तये तप:कुरुषे तस्मादिनेपुलोकेषुमध्येभारतवासिषु

तंत्वांविहायात्रतुयोमनुष्योदेहेत्रिधानावविदैहिकेषु जायात्मजज्ञातिधनेषुमज्जतेम
माययावंचितएवमूढ: २० त्वद्भक्तियोग्योनरदेहएव संकामयंतेपिचनाकसंस्था:
त्वद्भक्तिहीनंहिदिवोपिमोक्षमहंतुजानेनरकेनतुल्यम् २१ तपस्त्रिलोकस्था:कुरुषेषु
स्वायतत्रापितेनारतवासिषुंक अतुग्यहोसुरितुरोयदत्रकृतावतारोविचरस्विराजस
२२ तस्मात्त्वयंतेनवनात्रकुर्वंतेनएवशास्त्रेषुमना:कृपा: अतस्तवैकात्म्यमेववादंकुर्वन्यज
स्त्रंमयितेभक्तुष्टि: २१ भरतखंडवासिषुपुरुषेषु नरितरोक्षानतुग्रहोस्त्रियद्युस्मात् अत्रभारतेनैवर्षे
२२ स्वकृतोपकारानविज्ञतवास्तुतथा: अत:कारणात्तवैकमनन्यमाश्रयंवादंहदंयथानथाकुर्वतिमयिस्व
जस्त्रंनिरंतरंतेतववतुष्टि:प्रसन्नतास्तु २३

इतिश्रीवासुदेवमाहात्म्यटीकायांवैष्णवदत्तनाख्यायामेकत्रिंशोध्याय: ३१ तत:बदरिकाश्रमातत्राम्या
श्रामाभिधमितिसत्यायग्र:स्थलमूल:षट्त्रिंशदंगुलोदंड:त्राम्यामावस्थतासिप्रामतीयावदूरेपतेत्रावदेकंप

इतिश्रीस्कंदपुराणेविष्णुखंडेश्रीवासुदेवमाहात्म्येश्रीनरनारायणस्तुतिनिरूपणनामैकत्रिंशो
ध्याय:॥३१॥स्कंदउवाच॥इतिस्तुत्वातमीशानंनारद:सयथौतत: त्राम्याप्रासाभिधंब्रह्मन्व्यासस्या
श्रममादित: १ सादरंमानितस्तेनप्रत्युत्थानासनादिभि: तस्मादेकांतिकंधर्मंप्राहजिज्ञासवेसच २
ततोब्रह्मसभांगत्वाब्रह्मण:शृण्वतोमुनि: देवान्पितृन्महर्षीश्चतत्रस्थांस्तमुपादिशात् ३ तत्र
स्थितोभास्करश्चधर्ममेतंपुनर्मुने शुश्रावनारदात्सर्वंश्रुतंनारायणात्पुरा ४ जनंभवतीतियाज्ञि
कप्रसिद्धि:त्राम्याप्रास्यतेप्रक्षिप्यतेस्मिन्नितित्राम्याप्रास:यज्ञार्हभूमितयातिपवित्रदेशोस्त्यर्थ: १ तेनैव्या
सेन तस्मैव्यासाय सनारद: २ तमेकांतिकधर्मम् ३ तत्रब्रह्मसभायाम् पुराप्रथमकल्पेनारायणाच्छ्रोता

वासुदे
१३६

ङ्गतः सकाशादेव श्रुतं स्वेनेति शेषः तमेव नारदात्पुनः शुश्राव ४ आत्मनोऽस्य यायिन्यः पुरतो गच्छथ अ०३२

स प्राहात्मा गन्यायिन्यो वालखिल्येभ्य सादरात् मेरौ तेन संगतान्देवानिंद्रादींश्च स्वयमप
न ५ तेभ्योऽमितो मुनिः श्रुत्वा धर्ममेतं द्विजोत्तम पितृभ्यः कथयामास पितृलोकं गतः क
चित् ६ पितरस्ते त्वयं माद्याः कचिरेशं तनुं नृपम् सनी श्रावयस्य कुत्राय कथयामासमन
स्वतः ७ सोऽपि नारत सुखं तेधर्मराजाय पृच्छते शयानः शरशय्यायां प्राह संदिग्धप स
वि ८ तत्र श्रुत्वा नारदोऽपि विस्थितः सदसि सादरम् कैलासे शंकरं प्राह स च मां मुनिस
त्तम ९ मयानेक थितं ब्रह्मन्पृच्छते धर्मवर्त्मनि पात्राय तेन त्वं वत्स मितिमां हि पिताब्रवीत्

तेवालखिल्याः संगता मिलितान् स्वयमनुपादिशत् ५ तेभ्यो देवेभ्यः अमितो देवजः पितृभ्यो धर्ममादि
श्यः ६ ७ ८ तत्र संदिग्धित्वपविष्टः कैलासे आगत्येति शेषः ९ पात्राय श्रीकृष्णभक्ताय पिता श्रीशंकरः १०

तस्मिन् श्रीकृष्णे परामेकांतिकीम् ११ १२ मातुलेयं मातुलस्य वसुदेवस्य पुत्रं १३ सर्वकारणत्वं स्फु

येन येन श्रुतं ह्येतन्माहात्म्यं सात्वतां पतेः स स तत्क्षिप्रराणं तत्किंच कारस्व विमुक्तये ११
युधिष्ठिरोऽपि राजर्षिः श्रुत्वा भीष्मेण कीर्त्तितम् माहात्म्यं देवकीसूनोर्मुमुदे चाविनिःस
ह १२ तमात्मनो मातुलेयं सर्वकारणकारणम् निशाम्याश्चर्यजलधौ निममज्ज महामतिः
१३ वासुदेवादिकं व्यूहं वाराहादींश्च सर्वशः अवतारान्नृपो मेने स्यैव रमापतेः
१४ ततः सहानुजो राजा दिव्यमानुषविग्रहे श्रुत्वा तं नक्तिमान्कृष्णे बभूव द्विजसत्तम
१५ श्रुत्वेमां च कथां सर्वे ब्रह्मराजस्करर्षयः सनाथां तत्र ये चासंस्ते प्यन्नभवन्स विस्मयाः
१६ कृष्णमेव परं ब्रह्म विदित्वा तेन राकृतिं तत्किं पूर्पे दिशेत स्मिन्स्मरणं मंतस्तमादरात् १७

तस्य निवासुदेवेति अस्य श्रीकृष्णस्यैवेति १४ दिव्यः अमायिकः मानुषविग्रहो यस्य तस्मिन् १५ सद्मेति ब्र

वासुदे०
१३७

सर्वथोराजर्षयोदेवर्षयश्च १६ १७ १८ १९ अत्रममसरवंजात्मकेस्कांदे २० नकेवलमस्यपुराणस्यैवमार अ.३२

ह्यंतस्यास्तिमाहात्म्यमतस्त्वमपिमन्मते सर्वात्मनावासुदेवंतमेवभजभक्तितः १८ श्री
वासुदेवमाहात्म्यमेतत्तेकथितंमया दुर्वासनोपशमनंभगवद्भक्तिवर्द्धनम् १९ कथिता
निपुराणेत्रमयाख्यानानियानिते तेषांसारदंब्रह्मन्निर्मथ्यैवसमुद्धृतः २० वेदोपनि ६
षदांचैतद्धर्मोवैसांख्ययोगयोः पंचरात्रस्यकृत्स्नस्यधर्मशास्त्रस्यचानघ २१ धन्यंय
शस्यंचायुष्यमेतत्परममंगलम् साक्षाद्भगवतागीतंसर्वानर्थविनाशनम् २२ य
एतच्छृणुयात्पुण्यंकीर्त्तयेदथयःपठेत् वासुदेवेभवेत्तेषामचलानिर्मलामतिः २३ न
राएकांतिकास्तेचभवेयुस्तस्यमानवाः ब्रह्मरूपाव्रजंत्यंतेब्रह्मधामतमःपरम् २४

इदंकिंतुवेदादीनामपीत्याहवेदेतिरसःसारः २१ २२ तेषांश्रोतृवक्तृपाठकानाम् २३ तेचत्रयःतस्यवासुदेवस्य

२५ २६ २७ २८ शास्त्रजातस्यशास्त्रसमूहस्यशिरोमणेःशिरोमणित्वंमुख्यत्वंतयामान्यस्यप्राप्नोतिप्राप्नु

धर्मार्थीलभतेऽनेनधर्मंकामंचकामुकः॥धनार्थीधनमाप्नोतिमोक्षार्थीमोक्षमुत्तमम्॥
२५॥लभेतेनविद्यांविद्यार्थीमुच्येद्रुग्णश्चरोगतः॥एतच्छ्रवणमात्रेणसर्वपापक्षयोभवेत्॥२६॥
ब्राह्मंतेजोलभेद्विप्रःक्षत्रियश्चनरेशताम्॥धनंवैश्यःसुखंशूद्रःश्रवणादस्यचायुष्मान्॥
२७॥एतच्छ्रुत्वारणंगच्छन्विजयंचाप्नुयान्नृपः॥प्राप्नुयात्स्त्रीचसौभाग्यंकन्याचस्वेप्सितंवरम्
॥२८॥एतस्यस्तुतिकीर्त्तिस्यांशास्त्रजातशिरोमणेः॥यंयंयःकामयेत्कामंतंतंप्राप्नोतिमानवः
॥२९॥तस्मात्त्वंसर्वदाभक्त्यापठस्वेनद्विजोत्तम॥कामवाणीमनोभिस्त्वंभजेथाभक्तवत्सलम्॥
३०॥सौतिरुवाच॥एतन्महासेनमुखाद्विनिःसृतंसर्ववर्णिरापीयवचोमृतंसः चकारभक्तिंवसुदेव
नंदनेनराकृतिब्रह्मणिसर्वमंगले ३१

पात् २९ ३० महासेनःकार्त्तिकेयःआपीयसादरंश्रुत्वा सर्वे

वासुटी
१३८

धामविमंगलंयस्मात्तस्मिन् ॥३१॥३२॥ प्रकाशाश्वयेवस्ततेजःपुंजेमूर्त्तिर्यस्यतस्मै ॥ नमस्यानमोक्ष ॥ नक्षेरातं श्री ३२
इवर्द्दनायतेनिवा ॥३१॥ वैराग्यज्ञानधर्मानुगतनदितिजजिद्भक्तिपद्मांशुमालीमाशंगब्रह्मचर्यप्रथनदक्षुप
शाधर्मविद्विद्भिन्तान्तः ॥ स्त्रीयांघ्रजप्रपन्नांनरशिशुदिगिनोत्फालपंचाननाख्यःमेघ्योमोसेपुंडुंनिःस

पूर्यंचसर्वेनिगमागमतात्पर्यक्षणदेवंनजनीयमीशम् ॥ नजधुमेकंनमुदार
कीर्त्तिंश्रीवासुदेवंनिजधर्मसंस्थाः ॥३२॥ गोलोकधामपनयेप्रकाशाचयम्
तंये नमोस्तुवासुदेवायनक्षानंदविदुध्ये ॥३३॥ ॥इतिश्रीस्कंदपुराणेश
काशीतिसाहस्र्यांसंहितायांवैष्णामिकंाविष्णुखंडेश्रीवासुदेवमाहात्म्येनंथसंस
दायप्रवृत्तिनिरूपणानामद्वात्रिंशोध्यायः ॥३२॥ जयतिनगवान्सकुरुनीलकंठः ॥१॥ तस्या
त्तयेमंरचितामयाचैस्यवचत्मना श्रीवासुदेवमाहात्म्यटीकातुष्यतुतेनसंशेचिक्रमार्कशाकस्यैहिरमेनव

युञ्जमिते ॥ चंपाषड्यामियंपूर्णाजानाश्रीडुर्गपत्तने ॥१॥ इतिश्रीमदुद्धवसंप्रदायाचार्यश्रीम
द्धानंदस्वामिशिष्यदीनानाथभट्टविरचितायांस्कंदस्थवासुदेवमाहात्म्यटीकायांवैसवब
नाख्यायांद्वात्रिंशोध्यायः ॥३२॥ संवत् १८८९ नावर्षेश्रावणमासेशुक्लपक्षेसनिवासरे
तीथौसप्तम्यांदग्नंथसमाप्तम् स्वरूपानंदेनदंपुस्तकंलिखितं श्रीहरिकृष्णायनमः